# शिव अष्टोत्तर नामशतक स्तोत्रम

## Shiva Ashtottara Naama Shataka Stotram

---

शिवाष्टोत्तरनामशतकस्तोत्रम ।

देवा ऊचुः ॥

जय शंभो विभो रुद्र स्वयंभो जय शङ्कर ।
जयेश्वर जयेशान जय सर्वज्ञ कामद ॥१॥

नीलकण्ठ जय श्रीद श्रीकण्ठ जय धूर्जटे ।
अष्टमूर्तेऽनन्तमूर्ते महामूर्ते जयानघ ॥२॥

जय पापहरानङ्गनिःसङ्गाभङ्गनाशन ।
जय त्वं त्रिदशाधार त्रिलोकेश त्रिलोचन ॥३॥

जय त्वं त्रिपथाधार त्रिमार्ग त्रिभिरूर्जित ।
त्रिपुरारे त्रिधामूर्ते जयैकत्रिजटात्मक ॥४॥

शशिशेखर शूलेश पशुपाल शिवाप्रिय ।
शिवात्मक शिव श्रीद सुहृच्छ्रीशतनो जय ॥५॥

सर्व सर्वेश भूतेश गिरिश त्वं गिरीश्वर ।
जयोग्ररूप भीमेश भव भर्ग जय प्रभो ॥६॥

जय दक्षाध्वरध्वंसिन्नन्धकध्वंसकारक ।
रुण्डमालिन्कपालिंस्त्वं भुजङ्गाजिनभूषण॥७॥

दिगम्बर दिशाम्नाथ व्योमकेश चितांपते ।
जयाधार निराधार भस्माधार धराधर ॥८॥

देवदेव महादेव देवतेशादि दैवत ।
वह्निवीर्य जय स्थाणो जयायोनिजसम्भव ॥९॥

भव शर्व महाकाल भस्माङ्ग सर्पभूषण ।
त्र्यम्बक स्थपते वाचांपते भो जगतांपते ॥१०॥

शिपिविष्ट विरूपाक्ष जय लिङ्ग वृषध्वज ।
नीललोहित पिङ्गाक्ष जय खट्वाङ्गमण्डन ॥११॥

कृत्तिवास अहिर्बुध्न्य मऊडानीश जटांबुभृत ।
जगद्भ्रातर्जगन्मातर्जगत्तात जगद्गुरो ॥१२॥

पञ्चवक्त्र महावक्त्र कालवक्त्र गजास्यभृत ।
दशबाहो महाबाहो महावीर्य महाबल ॥१३॥

अघोरघोरवक्त्र त्वं सद्योजात उमापते ।
सदानन्द महानन्द नन्दमूर्ते जयेश्वर ॥१४।

एवमष्टोत्तरशतं नाम्नां देवकृतं तु ये ।
शंभोर्भक्त्या स्मरन्तीह शृण्वन्ति च पठन्ति च ॥१५॥

न तापास्त्रिविधास्तेषां न शोको न रुजादयः ।
ग्रहगोचरपीडा च तेषां क्वापि न विद्यते ।१६॥

श्रीः प्रज्ञाऽऽरोग्यमायुष्यं सौभाग्यं भाग्यमुन्नतिम ।
विद्या धर्मे मतिः शंभोर्भक्तिस्तेषां न संशयः ॥१७॥

इति श्रीस्कन्दपुराणे सहयाद्रिखण्डे शिवाष्टओत्तरनामशतकस्तोत्रं संपूर्णं॥

**www.shaivam.org**